# daivaGYa vallabhA Astrologer's beloved by VarAhmihir

# વરાહમિહિરરચિતા દૈવજ્ઞ વલ્લભા

## Document Information

Text title : daivaGYa vallabhA Astrologer's beloved by VarAhmihir

File name : daivaGYavallabha.itx

Category : jyotisha, sociology_astrology, varAhamihira

Location : doc_z_misc_sociology_astrology

Author : varaahamihira

Transliterated by : Manish Shrivastaw shrimanishmaharaj at yahoo.co.in

Proofread by : Manish Shrivastaw shrimanishmaharaj at yahoo.co.in

Latest update : December 20, 2003

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# daivaGYa vallabhA Astrologer's beloved by VarAhmihir

# વરાહમિહિરરચિતા દૈવજ્ઞ વલ્લભા

॥ ૐ ॥

DaivaGYa VallabhA text summary and encoding by Manish Shrivastaw

Prashna shastra is a unique and spinal branch of astrology, after all everyone has queries to be answered primarily. Daivagya VallabhA is also unique amongst other books on the subject, yet has been low profile, so much so that it arises some doubts about it's authorship, as Acharya Varahamihir's other works are very popular, e.g. BrihajjAtakam or Hora shastra, panchasiddhantika, brihatsamhita etc. It seems Varaha wrote it as a key book or guide in his early days. Here he worships Nrihari in the beginning (mangalacharana) not Surya as in his later works. In the end we can see that the author is putting in his personal experiences as if in a diary, when he discusses planets changing the direction of travel in certain positions. (37-40/ 15) Perhaps it was written before his famous Yogayatra, which deals with traveling in general. Varaha's son PrithuyashA wrote Hora SAra on the lines of his father's Hora shastra better known as Brihajjatakam. Prithuyasha is better known for his book on Prashna vidya, ShaTpanchashika which consists of 65 verses discussing some fundamental combinations of horary astrology. All these yogas exist in Daivagya Vallabha. A son gets inspired, if at all, by his father's magnificent work to preserve his heritage, not by someone else. May be Varahamihir wrote this book to teach his son Prithuysha, their traditional knowledge. We can see in the end as author explains thoroughly in Lagnachinta adhyAya (15th chapter) about wars, king and army's fate, subjects chiefly concerned and almost the question of

survival, literally for an astrologer in 6th century. In many occasions, names of earlier experts like Manittha, Maya, Satya, Bali, Yavanacharya have been taken with respect, here we can observe Varahamihir never had any qualms in accepting Yavana (Greek) mata as he was progressive and liberal, not rigid in views. The language, poetic style, insight behind combinations, synonyms of planets, signs, houses etc. don't sound modern at all. The book has covered everything, prashna lagna, determining the lagna (ascendant) by various means, PrashnakShar paddhati (initial letter of query) Shakun vichar (omens), prediction by Dreshkana, Trimshamsha, all these methods contribute to prove this text's era. Apart from it's author's name this book alone is enough to praise the person who created it, simply for it's excellent contents.

In 1st chapter Prashnavatar planet's conditions (avasthA) are described, definitions like Pravriddhavirya or ParihiyamAnvirya (for planet transiting towards it's exaltation or debilitation signs) are never heard of. Author discusses duties of answer seeker and astrologer both, the basics of making prediction.
In 2nd chapter ShubhAshubha author describes 'significators' or things covered by all 12 houses (bhAva kArakatva) and some basic principles. In 3rd chapter LAbhAlAbha combinations indicating financial profit or loss, are given. In 4th chapter SamanyagamAgam some basic yogas of travel, arrival or departure, are discussed.
5th chapter ShatrugamAgam deals with enemy's attack on one's country. 6th chapter PravAsachinta deals exclusively with the state of person gone abroad, his well being, possible arrival or captivity.
7th chapter JayaparAjaya deals with war queries explicitly, who'll be victorious, aggressor (YAyi) or attacked one (SthAyi).
8th chapter Rogashubha points out combinations for patient's health, recovering from or succumbing to disease. 9th chapter is about larceny, lost wealth's recovery, identification of thief. 10th

chapter ManomushtichintA answers silent queries in a rational way, explaining the size, color, sex of planets, leading to determine if it's living organism, animal, flora, or unanimated metal, a person is thinking about.
11th chapter Vrishtinirnaya briefly suggests rain indicating combinations. 12th chapter VivAhavichar is for concerns about marriage while 13th chapter Stripunjanma deals with child birth. 14th chapter Prakirna as the name suggests consists everything which the author thinks should not be left out. Relationship with others, planet's taste in food (e.g. if a planet is retrograde, dish having taste indicated by this planet, will be offered repeatedly to the person in question, yet he will refuse to eat it! 11/14), body parts indicated by Dreshkana (1/3rd of sign) wound marks etc on them for identifying or just surprising someone. Another method of telling whether a job can be accomplished or not, Shanku ChAya and Svapna (dreams) their result and timing of coming true, answering from 1st letter of question asked, dividing alphabets in 8 chapters governed by 7 planets (a, ka, cha, Ta, ta, pa, ya, sha varg) are all accumulated here. In 15th chapter Lagnachinta again the author describes fate of war strikes, army's every aspect, journey, food, camping, vehicles, loopholes etc are determined by Dreshkana. In the end he suggests favorable traveling times and combinations of unexpected journey.

Reading a book on astrology not only improves our knowledge on this special subject but also introduces us to ancient times and lifestyle as Jyotish covers all walks of life. I hope readers will enjoy it!
- Manish Shrivastaw. 21-12-2003.

## ॥ ૧ પ્રશ્નાવતારાધ્યાયઃ ॥

નત્વોદ્ગિરન્તમનલં ભૈરવમદ્વૈતમીશ્વરં નૃહરિમ્ ।
વરાહેણૈષા ક્રિયતે પ્રશ્ને દૈવજ્ઞવલ્લભારચના ॥ ૧ ॥

દીપ્તાદ્યં દશભેદં વ્યોમચરાણાં નિરુપ્ય ભાવફલમ્ ।
પૃષ્ટો યદ્યત્કથયતિ શુભાશુભં તત્તદન્યથા નોક્તમ્ ॥ ૨ ॥

દીપ્તો દીનઃ સ્વસ્થો મુદિતઃ સુપ્તઃ પ્રપીડિતો મુષિતઃ ।
પરિહીયમાનવીર્યઃ પ્રવૃદ્ધવીર્યોઽધિવીર્યશ્ચ ॥ ૩ ॥

સ્વોચ્ચે દીપ્તો નીચે દીનઃ સ્વગૃહે વ્યવસ્થિતઃ સ્વસ્થઃ ।
મુદિતો મિત્રગૃહસ્થો રિપુગેહસ્થો ભવેત્સુપ્તઃ ॥ ૪ ॥

અન્યૈર્વિજિતો યુદ્ધે નિપીડિતોઽસ્તંગતો મુષિતઃ ।
પરિહીયમાનવીર્યો નીચાભિમુખં પ્રસર્પશ્ચ ॥ ૫ ॥

ગચ્છન્ સ્વોચ્ચાભિમુખં પ્રવૃધવીર્યઃ સમાખ્યાતઃ ।
શુભવર્ગસ્થઃ ખેટોઽધિકવીર્યો વિપુલરશ્મિશ્ચ ॥ ૬ ॥

દીપ્તે સિદ્ધિરનુત્તમા નરપતેર્દીને ચ દૈન્યાગમઃ
સ્વસ્થે સ્વે મનસિ સ્થિતં ચ ભવતિ શ્રીકીર્તિસૌખ્યાદિકમ્ ।
આમોદો મુદિતે યથેપ્સિતફલપ્રાપ્તિઃ પ્રસુપ્તે વિપ-
-ત્પીડાશત્રુકૃતા પ્રપીડિતતનૌ મોષં ગતેઽર્થક્ષયઃ ॥  ૭ ॥

ભવતિ પ્રવૃદ્ધવીર્યે ગજતુરંગસુવર્ણભૂલાભઃ ।
તદ્વદધિવીર્યયુક્તે શક્તિત્રયસમ્પદાદિબાહુલ્યમ્ ॥  ૮ ॥

પુષ્પૈઃ ફલૈઃ કનકરત્નયુતૈઃ સ્વભૂમૌ
નક્ષત્રજાતિસહિતં ગ્રહરાશિચક્રમ્ ।
શ્રદ્ધાં અભ્યર્ચ્ય ભક્તિભરબંધુકંધરાગ્રઃ
વિધાય નિજચેતસિ નિર્વિકલ્પે ॥ ૯ ॥

પ્રાતઃ પુમાન્વિહિતદેવગુરુપ્રણામઃ પાણૌ
વહન્ કુસુમરત્નફલાક્ષતાશ્ચ ।
સત્કૃત્ય દૈવવિદમાદરમાદધાનઃ
પૃચ્છેત્સકૃચ્છુભમનાઃ શુભદિઙ્મુખસ્થઃ ॥ ૧૦ ॥

પ્રશ્નાક્ષરૈરુદયહેતુભિરુલ્લસદ્ભિર્બાહ્યસ્થિતૈશ્ચ
શકુનૈરધિગમ્ય સમ્યક ।
પ્રષ્ટુઃ શુભં ચ યદિ વાપ્યશુભં પ્રયત્નાત્તત્કાલજં
તદિહ દૈવવિદાઽભિધેયમ્ ॥ ૧૧ ॥

ફલભરકુસુમાભિરામભૂમિરુહભુવિ ગોમયપુષ્પતોયવત્યામ્ ।
ચરણસુખકૃતિ પ્રપૃચ્છતાં સ્યાદભિમતસિદ્ધિરસંશયેન પુંસામ્ ॥ ૧૨ ॥

દૃક્ચેતસોઃ સુખકરી યદિ ભૂમિરસ્તિ
માંગલ્યવસ્તુવિષયે શુભદર્શને ચેત્ ।
પ્રચ્છાવિધૌ શુભમુપસ્થિતમાદરેણ
તત્રાપિ વાચ્યમિતિ વક્તિ મયો મણિત્થઃ ॥ ૧૩ ॥

---

## ॥ ૨ શુભાઽશુભાધ્યાયઃ ॥

પ્રષ્ટુઃ શુભૈઃ પઞ્ચભિરિષ્ટલાભોઽનિષ્ટપ્રદૈઃ પઞ્ચભિરપ્યનિષ્ટમ્ ।
તુલ્યૈર્બલાબલવશાત્ફલમૂહનીયં જ્ઞેયં ચતુર્ભિરથ વાપિફલં બલાચ્ચ ॥ ૧ ॥

ભાવઃ સ્વેશેનેક્ષિતો વા યુતઃ સ્યાત્પાપાદન્યૈર્વાપિ તસ્યાસ્તિ વૃદ્ધિઃ ।
સૌમ્યા યસ્યાન્ત્યાસ્તખસ્વાંબુગા વા પાપૈરેવં હાનિરાદેશનીયા ॥ ૨ ॥

પર્યાયસંજ્ઞા ચૈતેષાં કથ્યતે મુનિસંમતા ।
કાર્યસંજ્ઞા ચ તસ્યોક્તા તસ્માત્પ્રશ્નવિચારણા ॥ ૩ ॥

આરોગ્યપૂજાગુણકલ્પવૃત્તમાયુર્વયોજાતિરદોષસૌખ્યમ્ ।
ક્લેશાકૃતી લક્ષણરૂપવર્ણાસ્તદ્ભાગિનેયસ્ય વધૂસ્તનૌ સ્યાત્ ॥ ૪ ॥

માણિક્યમુક્તાફલરત્નધાતુદ્રવ્યામ્બરસ્વર્ણહયાદિકાર્યમ્ ।
રૂપ્યં સધાન્યક્રયવિક્રયાદિ સાધારણંતદ્ભવતિ દ્વિતીયે ॥ ૫ ॥

સ્નુષાનુજક્ષેમસુબુદ્ધિલાભભૃત્યાદિદાસીભટકર્મકર્તુઃ ।
ભ્રાત્રાદિચિન્તાવિષયં સમગ્રં પર્યાયમેતત્ કથિતં તૃતીયે ॥ ૬ ॥

ગૃહં નિધાનં વિવરપ્રવેશો મહૌષધક્ષેત્રખલાદિવાટી ।
સુહૃજ્જલં વૈ પિતૃપપ્રયોગો ગમાગમૌ ગ્રામસુખાદિકં ચ ॥ ૭ ॥

સ્થાનચ્યુતિર્લાભગૃહપ્રવેશો વૃદ્ધિર્જનિત્રી જનકશ્ચ તદ્વત્ ।
દેશાદિકાર્યાણ્યપિ લાભમસ્ય પર્યાયમેતત્કથયન્તિ તુર્યે ॥ ૮ ॥

નાનાપ્રયોગો વિનયપ્રબન્ધવિનેયવિદ્યાનયબુદ્ધિમંત્રાઃ ।
સંધાનગર્ભાઙ્ગભવાદિકં ચ પ્રજ્ઞાસુતાર્થસ્ય ચ પંચમે સ્યાત્ ॥ ૯ ॥

અસ્વાસ્થ્યદૌસ્થિત્યવિપક્ષદાસક્રૂરોગ્રકર્માપરકૃત્યશઙ્કાઃ ।
યુદ્ધાદિતન્માતુલમાહિષાદ્યં રોગોઽપિ ચિન્ત્યો રિપુભાવતુલ્યઃ ॥ ૧૦ ॥

વસ્તુક્રયસ્વાસ્થ્યવણિજ્યવાદકામોદયો દાસકલત્રચૌર્યમ્ ।
નિવૃત્તિસ્વસ્રેયગમાગમાદ્યં કલત્રપર્યાયમિદં નિરુક્તમ્ ॥ ૧૧ ॥

આયુર્વિરોધો નિધનં ચ રાજ્યં ભેદોઽથ વા બન્ધુજનસ્ય છિદ્રમ્ ।
વૈષમ્ય દુર્ગાદિકલત્રશત્રુવધો નદીતારણમષ્ટમર્ક્ષે ॥ ૧૨ ॥

સ્વાધ્યાયદીક્ષાસુરગેહયાત્રા નૃપાભિશેકો ગુરુધર્મકૃત્યમ્ ।
જલાશયશ્યાલકદેવરાદીન્ ભ્રાતુર્ગૃહિણ્યો નવમસ્ય પૂર્વૈઃ ॥ ૧૩ ॥

આકાશવૃત્તાન્તજલપ્રપાતઃ સ્થાનં પિતુઃ કાર્યસુખાદિમાનમ્ ।
પુણ્યં નૃપત્વં ચ તથાઽધિકારો મુદ્રાચ્યુતિસ્તદ્દશમસ્ય તુલ્યમ્ ॥ ૧૪ ॥

કાર્યસ્ય વૃદ્ધિઃ ક્રયવૃદ્ધિલબ્ધિર્ગજાશ્વવસ્ત્રાદિકયાનશય્યાઃ ।
સ્વર્ણાનુવિત્તાપહૃતાદિકન્યાલાભો ગજાદેઃ શ્વસુરાદ્યમાયે ॥ ૧૫ ॥

ત્યાગાદિભોગેષ્ટિવિવાહદાનકૃષ્યાદિકર્મવ્યયસંક્ષતિશ્ચ ।
પિતૃવ્યયમાતૃષ્વસૃમાતુલાનીયુદ્ધેક્ષણં યુદ્ધપરાજયોઽન્ત્યે ॥ ૧૬ ॥

યદ્યદ્ભાવેષુ યદ્વસ્તુ કથિતં યવનાદિભિઃ ।
તત્કાર્યસંજ્ઞમાખ્યાતં તતઃ પ્રશ્નવિચારણા ॥ ૧૭ ॥

યસ્ય ભાવસ્ય યદ્વસ્તુ પ્રશ્નમાત્રે પ્રકાશિતમ્ ।
તત્પૃચ્છાયાં તુ તલ્લગ્નમેવં વા પૂર્વવદ્ ભવેત્ ॥ ૧૮ ॥

યદ્યદ્ભાવેષુ યત્કર્મ તસ્માલ્લગ્નવ્યવસ્થિતિઃ ।
અતીતાનાગતે કાર્યે ત્વતીતાનાગતાદપિ ॥ ૧૯ ॥

મૂર્દ્ધોદયે સૌમ્યવિલગ્નગે વા લગ્નેઽપિ વા સૌમ્યયુતે શુભં સ્યાત્ ।
અતોઽન્યથાત્વે તુ તદન્યથાત્વં મિશ્રં વિમિશ્રૈરધિકં બલાઢ્યૈઃ ॥ ૨૦ ॥

કેન્દ્રોપગા નવમપંચમગાશ્ચ સૌમ્યાઃ કેન્દ્રાષ્ટવર્જ્યમશુભાસ્ત્રિષડાયસંસ્થાઃ ।
સર્વાર્થસાધનકરાઃ પરિપૃચ્છતાં સ્યુરેભિર્વિપર્યયગુણૈસ્તુ વિપર્યયઃ સ્યાત્ ॥ ૨૧ ॥

કેન્દ્રાદિનાથો યદિ લગ્નગઃ સ્યાત્તન્મિત્રમેતસ્ય ચ કેન્દ્રગં વા ।
વ્યયાષ્ટકેન્દ્રાણ્યપહાય પાપાશ્ચાન્યત્ર યાતા યદિ તચ્છુભં સ્યાત્ ॥ ૨૨ ॥

નરરાશિલગ્નમભિવીક્ષિતં શુભૈરુદયાસ્તબન્ધુદશગૈઃ શુભૈસ્તથા ।
ત્રિકલાભષષ્ઠભગતૈસ્તથાશુભૈઃ શુભલાભવિત્તવિષયાંસ્તદા વદેત્ ॥ ૨૩ ॥

કન્યાતુલા ચ મિથુનં ચ ઘટો નૃરાશિશ્ચૈતેષુસૌમ્યસહિતેષુ શુભં વિભાવ્યમ્ ।
પાપા વ્યયાયભગતા ન શુભા વિલગ્ને પાપઃ શશી ન શુભદો દશમે શુભશ્ચ ॥ ૨૪ ॥

ચતુષ્પદે વા દ્વિપદે વિલગ્ને પાપગ્રહસ્તેન તદીક્ષિતેશ્ચ ।
શુભગ્રહૈસ્ત્વીક્ષિત એવ વૃદ્ધિં નૃરાશિલગ્ને તુ શુભં સમસ્તમ્ ॥ ૨૫ ॥

ઉદયતુહિનદીધિતી ભવેતાં યદિ ચ શુભૈરભિવીક્ષિતૌ તદાનીમ્ ।
શુભમશુભમતોઽન્યથેત્યભીષ્ટં ગુણિગણમૌલિમણેઃ શશિપ્રભોસ્તુ ॥ ૨૬ ॥

---

॥ ૩ લાભાઽલાભાધ્યાયઃ ॥

લાભાસ્તપંચસહજેષુ શુભગ્રહાઃ સ્યુર્લાભપ્રદા દદતિ નેષ્ટફલાનિ પાપાઃ ।
સ્થાનં શુભા દશમસપ્તમગાશ્ચ દદ્યુર્માનાર્થદા દ્વિતીયપંચમલગ્નગાશ્ચ ॥ ૧ ॥

ચન્દ્રં સપ્તદશદ્વિષષ્ઠસહજાયસ્થાનસંસ્થં શુભઃ
પશ્યેદ્વૈ પ્રમદાકૃતં શુભફલં લાભાદિકં
સ્યાત્તદા ।
લગ્નાષ્ટત્રિનવાત્મજેષુ ચ ભયં કાયાર્થનાશોઽશુભૈ-
-રેતેષ્વેવ ગતાઃ શુભાસ્તુ શુભદા
માનાર્થસમ્પત્તયે ॥ ૨ ॥

ત્રિકોણકેન્દ્રાલયગાઃ શુભગ્રહાસ્તથાઽશુભાશ્ચ ત્ર્યરિલાભગા યદિ ।
ભવન્તિ લાભાય તદાઽઽશુ પૃચ્છતાં વિપર્યયસ્થાસ્તુ ન લાભદા અમી ॥ ૩ ॥

ચન્દ્રશ્ચતુર્થે યદિ સપ્તમે શુભો વિલગ્નગો વા દશમે વિવસ્વાન્ ।
સદ્યોઽર્થલાભો મનુજસ્ય વાચ્યસ્તદેતિ સત્યો બલિરેવમાહ ॥ ૪ ॥

વૃષહર્ય્યાલિઘટૈઃ સ્થાનપ્રાપ્તિં વદેન્ન ચરરાશૌ ।
દ્વિતનૌ લગ્નોપગતે ચરસ્થિરોક્તં ફલં દલતઃ ॥ ૫ ॥

---

॥ ૪ સામાન્યગમાઽઽગમાધ્યાયઃ ॥

સ્થિરે વિલગ્ને ન ગમાગમૌ સ્તશ્ચરે વિલગ્ને તુ વિનિશ્ચિતૌ તૌ ।
મિશ્રં ફલં સ્યાદ્વિ તનૌ તદર્ધં દ્વયે ચરસ્થાવરવત્તદૂહ્યમ્ ॥ ૧ ॥

સૂરસૌરિગુરુસૌમ્યસિતાનામેકકોઽપિ ચરલગ્નગતશ્ચેત્ ।
આશુ તર્હિ ગમનં સ્પૃહણીયં વક્રતામુપગતસ્તુ ન હીતિ ॥ ૨ ॥

સ્થિરરાશિલગ્નવર્તી ગુરુબુધસિતભાસ્કરેષુ યદ્યેકઃ ।

ગન્તુઃ પથો નિવૃત્તિં જનયતિ નિઃસંશયં પ્રશ્ને ॥ ૩॥

રવિર્વા ગુરુર્વા બુધો વા સિતો વા ભવેદાયરાશિસ્થિતઃ પ્રશ્નકાલે ।
ગતિઃ પ્રચ્છતઃ શીઘ્રમેવાભિધેયા નિવૃત્તિં પથોઽમીભિરન્ત્યાલયસ્થૈઃ ॥ ૪॥

સૌરાંગિરસોઃ પશ્યેદેકોઽપિ વા સ્થિરં સમુદ્યન્તમ્ ।
પ્રષ્ટાઽઽગમનં પ્રચ્છેત્તસ્યાગમનં ન વક્તવ્યમ્ ॥ ૫॥

ષષ્ઠત્રિકોણસંસ્થૈઃ પાપૈશ્ચ પાપસંદૃષ્ટૈઃ ।
ગમનાગમનં ચ વાચ્યં સ્થિરલગ્ને ચેચ્ચરે તુ વિપરીતમ્ ॥ ૬॥

ચન્દ્રતોઽથ્ યદિ વા વિલગ્નતો દ્વાદશદ્વિતયરાશિગામિનઃ ।
શુક્રવાક્પતિશશાન્કનન્દનાઃ કા ગમાઽઽગમકથાઽસ્તિ પૃચ્છતઃ ॥ ૭॥

બલેન સર્વોત્તમતામુપાગતો ગ્રહો ગૃહે યાવતિ લગ્નતો ભવેત્ ।
પ્રવાસતસ્તત્સમસંખ્યમાસતો નિવર્તનં ગન્તુરસંશયં વદેત્ ॥ ૮॥

ચરાંશકસ્થે કિલ કાલ એષ સ્થિરાંશકે તદ્વિગુણસ્તુ વાચ્યઃ ।
દ્વિદેહલગ્નાંશગતે ગ્રહે તુ વિચિન્તિતસ્તત્ત્રિગુણો વિધેયઃ ॥ ૯॥

યાતુઃ પૃચ્છાલગ્નતઃ સપ્તમસ્ય સ્વામી યાયાદ્યાવતા વક્રભાવમ્ ।
કાલેનૈતિ પ્રસ્થિતસ્તાવતેતિ પ્રાહુસ્ત્વેતે પ્રશ્નતત્ત્વપ્રવીણાઃ ॥ ૧૦॥

---

॥ ૫ શત્રુગમાગમાધ્યાયઃ ॥

પાપૈ રિપુસ્થૈર્યદિ વા સુતસ્થૈર્નિવર્તતે વર્ત્મત એવ શત્રુઃ ।
ચતુર્થગૈરન્તિકસંગતોઽપિ પરાઙ્મુખો ગચ્છતિ ભગ્નસૈન્યઃ ॥ ૧॥

ચતુર્થગૈરલિમીનકર્કટૈઃ પરાજયો ભવતિ શુભૈર્વિલોકનાત્ ।
ચતુષ્પદૈઃ પુનરિહ તુર્યવર્તિભિઃ પલાયતે નિયતમરાતિરાગતઃ ॥ ૨॥

ચરોદયે ભવતિ યદા શુભગ્રહસ્તદા ભૃશં જનયતિ યાયિનાં શુભમ્ ।
ચરોદયે ત્વશુભસમન્વિતે શુભં સ્થિરોદયે ભવતિ શુભં વ્યવસ્થયા ॥ ૩॥

સ્થિરે શશાંકે ચરરાશિલગ્ને નવાંશકે વાઽસ્યરિપુસ્તદૈતિ ।
ચરે શશાંકે સ્થિરરાશિલગ્ને નવાંશકે તસ્ય તુ વા ગમઃ સ્યાત્ ॥ ૪॥

શીતગૌ દ્વિતનુરાશિસંસ્થતે લગ્નતામુપગતો યદિ સ્થિરઃ ।
શત્રુરેત્ય વિનિવર્તતેઽરિભે ક્ષ્જ્તશુક્રસહિતે વિનશ્યતિ ॥ ૫॥

લગ્ને સ્થિરે ગુરુશનૈશ્ચરદૃષ્ટિદૃષ્ટે શત્રોર્નવા ગમનમાગમનં ન વા સ્યાત્ ।
પાપાસ્ત્રિપંચરિપુગા રિપુસંગમાય તુર્યે સ્થિતાઃ પુનરરાતિનિવર્તનાય ॥ ૬ ॥

ચન્દ્રશ્ચરે દ્વિતનુલગ્નમથો પથોઽર્ધમાગત્યગચ્છતિ રિપુર્દ્વિતનૌ ચ ચન્દ્રે ।
લગ્ને ચરે રિપુરુપૈતિ બલદ્વયેન પાપેક્ષણાદ્ભવતિ તસ્ય પરાજયોઽપિ ॥ ૭ ॥

ચન્દ્રાર્કૌ યદિ હિબુકે સ્થિતૌ ભવેતામત્યુગ્રં ન હિ પરચક્રમભ્યુપૈતિ ।
આક્રાન્તં ગુરુબુધભાર્ગવૈશ્ચતુર્થં સ્થાનં ચેત્ત્વરિતમુપૈત્યરિસ્તદાનીમ્ ॥ ૮ ॥

સિંહાજકોદંડવૃષા ભવન્તિ વિલગ્નગા વાપિ ચતુર્થગા વા ।
ગ્રહેણ યુક્તા યદિ વા વિયુક્તા ધ્રુવં તદા તિષ્ઠતિ નૈવ શત્રુઃ ॥ ૯ ॥

રવૌ ગુરૌ વા સ્થિરલગ્નગામિનિ સ્થિતો રિપુઃ સ્વાશ્રમ એવ નિશ્ચલઃ ।
રવૌ ગુરૌ વાથ ચરોદયસ્થિતે વદેદરાતેરચિરાત્સમાગમમ્ ॥ ૧૦ ॥

સુરાચાર્યદેવદ્વિષન્મન્ત્રિણૌ દ્વૌ દ્વિતીયે તૃતીયે યથા વા તથા વા ।
તદા ક્ષિપ્રમાયાત્યરાતિઃ સ્થિરસ્થૈર્ન લગ્નેશધર્મેશકર્મેશભેશૈઃ ॥ ૧૧ ॥

યાવત્સંખ્યં ભવતિ રજનીનાથગેહં વિલગ્ના-
-ન્નૈકોઽપિસ્યાન્નિયતમનયોર્મધ્યવર્તી ગ્રહશ્ચેત્ ।
તાવત્સંખ્યૈરપિ ગતદિનૈઃ શત્રુરાગચ્છતીતિ
જ્યોતિર્વિદ્યાવિપુલગણકગ્રામણીરુદ્ગૃણાતિ ॥ ૧૨ ॥

॥ ૬ પ્રવાસચિન્તાધ્યાયઃ ॥

લગ્નતઃ સહજપુત્રવિત્તગા દૂરગાગમનશંસિનો ગ્રહાઃ ।
નષ્ટલમ્ભનકરાઃ શુભગ્રહાઃ શીઘ્રમાગમકરૌ તુ મન્ત્રિણૌ ॥ ૧ ॥

બૃહસ્પતૌ કેંદ્રગતે તુ કશ્ચન ગ્રહો ભવેત્ ષષ્ઠગતોઽથ સપ્તમઃ ।
ભવેત્તદા પ્રોષિત પૂરુષાગમસ્ત્રિકોણગે ચન્દ્રસુતે સિતેઽપિ વા ॥ ૨ ॥

અષ્ટમે શશિનિ પાપવર્જિતે કંટકે સુખમુપૈતિ ચાધ્વગઃ ।
કણ્ટકસ્થિતશુભગ્રહૈઃ શુભં સ્વં નિવાસમયેતિ લાભવાન્ ॥ ૩ ॥

પૃષ્ઠે લગ્ને પાપદૃષ્ટે વધો વા બન્ધો વા સ્યાત્સૌમ્યદૃષ્ટે તુ ન સ્યાત્ ।
પાપે ષષ્ઠે કેન્દ્રગે વા તૃતીયે નષ્ટો ભ્રષ્ટઃ સ્થાનતઃ પ્રચ્યુતો વા ॥ ૪ ॥

યથા તથા યદિ ભવતઃ કથંચન દ્વયે ત્રયે સુરગુરુદૈત્યમંત્રિણૌ ।
પ્રવાસિનાં ભવતિ તદાઽઽગમો નૃણાં તુરીયગૌ નિયતગૃહપ્રવેશદૌ ॥ ૫ ॥

પાપકૈઃ ષષ્ઠલાભત્રિકસ્થાયિભિઃ સૌમ્યકૈઃ કિંચ કેંદ્રત્રિકોણસ્થિતૈઃ ।
દૂરગસ્યાગમો નિર્વિશંકં સ્ફુટં જલ્પનીયો ગ્રહગ્રંથવિદ્ભિઃ સદા ॥ ૬ ॥

અશુભર્ક્ષગતોઽશુભૈશ્ચદૃષ્ટશ્ચતુરસ્રગૃહેઽથવા ત્રિકોણકે ।
દિવસેશ્વરનંદનોઽધ્વગાનાં નિયતં શંસતિ બન્ધનં તદાનીમ્ ॥ ૭ ॥

શુભયુક્તે સ્થિરલગ્ને સુસ્થિરબન્ધશ્ચરે ત્વશુભયુક્તે ।
ક્ષિપ્રં ભવતિ વિમોક્ષો દ્વિતનૌ કાલક્રમાન્મોક્ષઃ ॥ ૮ ॥

અરિભિરવલોક્યમાનાસ્ત્રિકોણયામિત્રગા પાપાઃ ।
પૃષ્ઠોદયં વિલગ્નં સૌમ્યાદૃષ્ટં ચ પન્થમરણાય ॥ ૯ ॥

અધ્વસ્થાને સૌમ્યૈરધ્વા નિરુપદ્રવોઽધ્વનીનસ્ય ।
ભયરોગપરિક્લેશાઃ પાપૈર્લગ્નસ્થિતૈસ્તસ્ય ॥ ૧૦ ॥

ગૃહે ગ્રહો યાવતિ લગ્નતો ભવેત્તદા હતા દ્વાદશ રાશયઃ સ્ફુટમ્ ।
અવેહિ તાવદ્દિવસૈર્ગતાગમં નિવર્તનં વક્રગતગ્રહેણ ચ ॥ ૧૧ ॥

॥ ૭ જયપરાજયાધ્યાયઃ ॥

દશમસપ્તમલગ્નગતાઃ શુભા નગરવાસિનૃપસ્ય જયપ્રદાઃ ।
શનિકુજૌ નવમે ભયભંગદૌ વિજયદા ગુરુભાર્ગવચન્દ્રજાઃ ॥ ૧ ॥

નાગરાશ્ચક્રભાગૈસ્તૃતીયાદિતઃ પ્રશ્નલગ્નાશ્ચ ધર્માદિતો યાયિનઃ ।
તત્ર સૌમ્યેન જુષ્ટૌ જયપ્રાપ્તિદઃ પાપજુષ્ટસ્તુ ભાગો ભવેદ્ ભંગભાક્ ॥ ૨ ॥

મિશ્રયુક્તે વિમિશ્રં ફલં નિર્દિશેત્તદ્વિરૂપં ફલં કેચિદાક્ષતે ।
પંક્તિલાભવ્યયસ્થાસ્તુ પાપગ્રહા યાતુરિષ્ટાઃ પરં તત્પુરસ્યાશુભાઃ ॥ ૩ ॥

મિથુનતુલાઘટકન્યામેષાણામેકકોઽપિ પાપયુતઃ ।
યદિ ભવતિ તદા વિજયો ગન્તુઃ સ્થાસ્નોભવેદ્ભંગઃ ॥ ૪ ॥

લગ્ને નૃરાશિભવને યદિ સન્તિ સૌમ્યાઃ કેન્દ્રવ્યયાયભવનેષ્વશુભા ભવન્તિ ।
સન્ધિસ્તદા દ્રુતતરં પ્રવદેન્નરાણાં પાપૈર્દ્વિદેહગૃહગૈસ્તુ વિરોધમાહુઃ ॥ ૫ ॥

કેન્દ્રસ્થિતા યદિ શુભા યદિ વા ભવન્તિ લગ્ને નૃરાશિભવને શુભદૃષ્ટિ પુષ્ટઃ ।
પ્રીતિસ્તદા ભવતિ પાપવિલોકિતૈસ્તુ પાપૈરમીષુ ભવનેષુ ભવેદ્વિરોધઃ ॥ ૬ ॥

અશુભગ્રહસ્થલગ્ને બલિભિસ્ત્વશુભૈશ્ચ વીક્ષિતે યુક્તે ।
યુદ્ધં મહદાદેશ્યં ક્ષુદ્રં સૌમ્યગ્રહૈર્દૃષ્ટે ॥ ૭ ॥

સૂર્યસમીરણસુરગુરુશુક્રાન્ સમરે પૃષ્ઠતઃ કૃત્વા ।
જયતિ પરાન્કેવલમપિ પરમફલં પ્રાહ યવનેન્દ્રઃ ॥ ૮॥

કેન્દ્રગમર્કં કેન્દ્રી યદિ શનિરુદ્વીક્ષિતે તદા ભંગઃ ।
એવંવિધશનિદૃષ્ટે મૃત્યુગતેઽર્કે ભવેન્મૃત્યુઃ ॥ ૯॥

લગ્ને સ્વાવષ્ટમગે શશાંકે કુજાર્કજાભ્યામવલોક્યમાને ।
અર્કેઽષ્ટમે લગ્નગતે ચ ચન્દ્રે ભઙ્ગો ભવેત્ પ્રષ્ટુરસંશયેન ॥ ૧૦॥

જીવજ્ઞસૂર્યભૃગુજાસ્તનયે હિ લોકદુશ્ચિક્યલગ્નભવને પરિપૃચ્છતઃ સ્યુઃ ।
લાભસ્થિતાશ્ચ શશિભાસ્કરિભૂમિપુત્રા યાયી વિજિત્ય રિપુમેતિ ગૃહં કૃતાર્થઃ ॥ ૧૧॥

લગ્ને વા ક્ષિતિસુતમન્દયોઃ સુતસ્થે જીવેઽર્કે દશમગૃહાશ્રિતે વિલગ્નાત્ ।
લાભે વા નભસિ સિતેન્દુપુત્રયોર્વા પ્રશ્નેવં સમિતિ રિપૂઞ્જયત્યવશ્યમ્ ॥ ૧૨॥

જીવતીવ્રકરશીતમયૂખૈર્લગ્નશત્રુદશગૈર્જયસિદ્ધિઃ ।
તદ્વદેવ ગુરુભાર્ગવસૂર્યૈર્લગ્નશત્રુદશગૈરવધાર્યમ્ ॥ ૧૩॥

આયે ગુરૌ સ્યાત્સચિવસ્ય લાભઃ કર્મસ્થયોઃ સૂર્યજભૌમયોશ્ચ ।
ચતુર્થગે જ્ઞેઽષ્ટમગે શશાંકે જાયાસ્થિતે ચાપિ ભૃગૌ જયઃ સ્યાત્ ॥ ૧૪॥

દશમગેહગતે ક્ષિતિનન્દને કિરણમાલિનિ લાભગૃહં ગતે ।
સહજગેઽર્કસુતે રિપુગે વિધૌ તદિતરૈરુદયાલયગૈર્જયઃ ॥ ૧૫॥

ભૂમિનન્દનતીવ્રભાનુશનૈશ્ચરૈઃ સહજસ્થિતૈર્લગ્નગૈશ્ચ
શુભગ્રહૈરિહ પ્રચ્છતાં વિજયઃ સ્ફુટઃ ।
લગ્નશાલિનિ વા ગુરૌ વિશુભૈસ્તુ લાભગૃહગતૈઃ
કર્મગૈરથવા જયો ભવતીતિ ચાહ પરાશરઃ ॥ ૧૬॥

ક્ષિતિસુતસૂર્યસુતૌ યદિ ષષ્ઠે સુરગુરુચન્દ્રમસૌ યદિ વિલગ્ને ।
શશિસુતદૈત્યગુરૂ યદિ ચાયે દિવસકરો દશમે જયાય ॥ ૧૭॥

નવમાત્મજલગ્નગૈરિહ સ્યાચ્છનિશીતાંશુકુજૈર્નૃપસ્ય ભંગઃ ।
વસુધાસુતદૃષ્ટયોર્વિલગ્ને શશભૃન્મન્દગયોર્ભવેચ્ચ મૃત્યુઃ ॥ ૧૮॥

અષ્ટમે કુજયુતે શનૈશ્ચરે લગ્નગે ચ મરણં દિવાકરે ।
ત્ર્યાયમૃત્યુષુ ચ રોહિણીપતૌ સ્યાદ્વધઃ સમિતિ ભાસ્કરાનુગે ॥ ૧૯॥

કુજબુધશનિભિઃ સ્મરસ્થિતૈર્ભવતિ રિપૂનથ ગચ્છતો વધઃ ।

ઉદયગૃહગયોઃ સિતારયોરપિ ચ રિપૂપચયઃ ક્ષુધામૃતિ ॥ ૨૦ ॥

વિજ્ઞેયાઃ ક્ષિતિસુતમન્દયોર્વિલગ્ને ષષ્ઠર્ક્ષે બુધસિતયોરિહાષ્ટમર્ક્ષે ।
તીક્ષ્ણાંશોર્ધ્રુવમિતિ પાપિનો રિપૂણાં સંગ્રામે પટુતરમન્ત્રિણો વધાય ॥ ૨૧ ॥

વિલગ્નાત્મજસ્થાનસંસ્થૈરવશ્યં વધં પ્રષ્ટ્રપુત્રસ્ય જાનીહિ પાપૈઃ ।
સચન્દ્રે કુજે લગ્નગે સૌરિદૃષ્ટે પુનઃ સંગરે ભંગ એવં પ્રદિષ્ટઃ ॥ ૨૨ ॥

દ્યૂનનૈધનગતે સિતદ્યુતૌ લગ્નગામિનિ ચ તીક્ષ્ણદીધિતૌ ।
ગચ્છતઃ સમિતિ વા વિપર્યયે ત્રાસભંગમરણાગમા ધ્રુવમ્ ॥ ૨૩ ॥

દ્વિત્રિકેન્દ્રસ્થિતૈઃ પાપરૂપૈર્ગ્રહૈઃ શક્તિહાનિં વહદ્ભિઃ સ્વકીયાંશુભિઃ ।
અષ્ટમસ્થે નિશાનાયકે ભૂભુજાં બન્ધનાશાત્યયાઃ સ્યુઃ રણે પૃચ્છતામ્ ॥ ૨૪ ॥

દ્યૂને મહીનન્દનચન્દ્રયોઃ સ્યાદ્ બુધોઽર્કલગ્ને સ્વબલસ્ય ભેદઃ ।
યમારયોસ્તદ્વદવેહિ ભઙ્ગં યુદ્ધે બુધાહસ્કરયોસ્તથૈવ ॥ ૨૫ ॥

સર્વૈરમીભિર્નવમસ્થિતૈઽતુ હન્યાન્નૃપો મંત્રિપુરોહિતાદીન્ ।
અત્રૈવ યોગે ચ શશી વિલગ્ને સ દેશિકાશ્વસ્થપતિસ્વપુત્રાન્ ॥ ૨૬ ॥

અર્કસૂર્યસુતયોશ્ચ વિલગ્ને દૃષ્ટયોશ્ચધરણીતનયેન ।
અસ્તગે શશધરે બલહીનૈર્વાહિનીપતિવધઃ કિલ સૌમ્યૈ ॥ ૨૭ ॥

અસ્તગે શશિના લગ્નગે રવાવષ્ટમે કુજશનૈશ્ચરૌ યદા ।
જ્ઞસ્તૃતીયગૃહગસ્તદા રણે મંત્રિણા સહ વિહન્યતે નૃપઃ ॥ ૨૮ ॥

શીર્ષોદયં જ્ઞુભસુહૃદ્ગ્રહયુક્તદૃષ્ટં લગ્નં શુભા બલયુતાઃ શુભવર્ગલગ્ને ।
સર્વાર્થસિદ્ધિદમતોઽન્યદનિષ્ટમેવ પ્રસ્થાનજન્મફલયુક્તિભિરન્યદૂહ્યમ્ ॥ ૨૯ ॥

## ॥ ૮ રોગશુભાધ્યાયઃ ॥

લગ્નસ્થિતો વાઽષ્ટમસંસ્થિતો વા પાપગ્રહો યસ્ય તુ જન્મરાશિમ્ ।
નિરીક્ષતે તસ્ય ગદાર્દિતસ્ય નિઃસંશયં મૃત્યુમુદાહરન્તિ ॥ ૧ ॥

પૃષ્ઠોદયે વિલગ્ને ક્રૂરાઃ કેન્દ્રેઽષ્ટગઃ શશી યસ્ય ।
રોગાર્તસ્ય વિનાશો દૃષ્ટે વા બલયુતૈઃ પાપૈઃ ॥ ૨ ॥

શશિનં શશિપુત્રં વા પશ્યતિ પાપો વિલગ્નગેહસ્થમ્ ।
આદેષ્ટવ્યઃ પ્રષ્ટુઃ કષ્ટો વ્યાધિર્ન સંદેહઃ ॥ ૩ ॥

સૌમ્યગ્રહા યદિ સુતસ્મરમૃત્યુસંસ્થાઃ પાપા ભવન્તિ ચ શુભગ્રહદૃશ્યમાનાઃ ।
આયત્રિષડ્દશમગશ્ચ નિશાકરઃ સ્યાત્ તસ્માચ્છુભાશ્ચ યદિ વા શુભમાહુરસ્ય ॥ ૪ ॥

પાપેક્ષિતઃ પાપયુતઃ શુભાનાં દૃગ્યોગહીનો નવમઃ શનિશ્ચેત્ ।
તદા રુજાર્તઃ પરદેશગઃ સ્યાત્ ષષ્ઠાષ્ટમે મૃત્યુકરસ્ત્વવશ્યમ્ ॥ ૫ ॥

ઉપચયગૃહગે ચન્દ્રે શુભેષુ કેન્દ્રત્રિકોણનિધનેષુ ।
શુભદૃષ્ટે વા લગ્ને રોગી દેશાન્તરે નીરુક્ ॥ ૬ ॥

લગ્નગતઃ પરિપૂર્ણો રજનિજાનિર્વિલોકિતો ગુરુણા ।
કેન્દ્રે વા ગુરુભૃગુજૌ રોગાર્તસ્તત્ર નીરોગઃ ॥ ૭ ॥

પ્રશ્નશ્ચેત્સ્થિરલગ્ને તદા ન મરણં ન રોગશાન્તિર્વા ।
ચરલગ્ને વિપરીતં દ્વિદેહલગ્ને તુ પૂર્વમિવ ॥ ૮ ॥

॥ ૯ નષ્ટલાભાઽલાભાધ્યાયઃ ॥

સ્થિરોદયે વા યદિ વા સ્થિરાંશે વર્ગોત્તમે વા યદિ વા વિલગ્ને ।
તત્રૈવ તચ્ચોરિતમસ્તિ વસ્તુ સ્વકેન કેનાપિ ચરે પરૈસ્તુ ॥ ૧ ॥

દ્વિશરીરરાશિલગ્ને પ્રતિવેશિજનેન હૃતમુદાહાર્યમ્ ।
તત્રસ્થં સ્થિરરશૌ ચરરશૌ તચ્ચ સઞ્ચલિતમ્ ॥ ૨ ॥

લગ્ને પ્રજાતે દ્વિતનૌ હૃતં સ્વં ગૃહાદ્બહિર્નિર્ગમિતં વિચિન્ત્યમ્ ।
હર્તા સવીર્ય્યાસ્તગખેટતુલ્યો નૌજે નૃદૃષ્ટે દયિતાઽન્યથાતઃ ॥ ૩ ॥

લગ્નાંશકાદપહૃતદ્રવિણસ્ય જાતિર્દ્રેષ્કાણતસ્તદપહર્તૃજનસ્વરૂપમ્ ।
દિગ્દેશકાલકલનં કિલ રાશિતઃ સ્યાલ્લગ્નાંશકાદ્ભવતિ જાતિવયોવિભાગઃ ॥ ૪ ॥

વયાંસિ તેષાં સ્તનપાનબાલ્યવ્રતસ્થિતા યૌવનમધ્યવૃદ્ધાઃ ।
અતીવ વૃદ્ધા ઇતિ ચન્દ્રભૌમજ્ઞશુક્રજીવાર્કશનૈશ્ચરાણામ્ ॥ ૫ ॥

રવીન્દુયુક્તે શનિભૌમદૃષ્ટે સિંહોદયેઽન્ધઃ કિલ તસ્કરઃ સ્યાત્ ।
વામેન કાણઃ શશિનિ વ્યયસ્થે સ ચક્ષુષાઽન્યેન રવૌ વ્યયસ્થે ॥ ૬ ॥

ક્રૂરઃ ષષ્ઠઃ ક્રૂરરાશૌ વિલગ્નાદ્યસ્મિન્નાશૌ તત્પ્રદેશે વ્રણોઽસ્ય ।
એવં પ્રોક્તં યન્મયા જન્મકાલે ચિહ્નં રૂપં તત્તદસ્મિન્વિધેયમ્ ॥ ૭ ॥

આદ્યે હૃતં નિપતિતં તદનુ દ્વિતીયે દ્રવ્યં ચ વિસ્મૃતમથો યદિ વા તૃતીયે ।
દ્રેષ્કાણકેષુ પરિકલ્પ્યમિદં ક્રમેણ વાચ્યં હૃતં તદપિ વેશ્મમુખેઽન્તરેઽન્ત્યે ॥ ૮ ॥

ગ્રહૈર્દિશઃ કેન્દ્રગતૈર્વિચિન્ત્યા વિલગ્નરાશેસ્તદસમ્ભવે વા ।
વિલગ્નમધ્યાચ્ચલિતૈર્નવાંશૈર્વિચિન્તનીયાનિ હિ યોજનાનિ ॥ ૯ ॥

શુક્રે ધને દેવગુરૌ વ્યયસ્થે મૂર્તૌ શુભે વા હૃતલબ્ધિરુક્તા ।
હોરેન્દુયુક્તાલયદિઙ્મુખેષુ સૂર્યેણ લગ્નાધિપરાશિભૂમૌ ॥ ૧૦ ॥

પૂર્ણઃ શશી યદિ વિલગ્નતઃ શુભો વા શીર્ષોદયે યદિ પુનઃ શુભદૃષ્ટિદૃષ્ટઃ ।
લાભસ્થિતો બલયુતો યદિ વા શુભઃ સ્યાત્ નષ્ટસ્ય લાભમચિરેણ તતઃ કરોતિ ॥ ૧૧ ॥

લગ્નાદ્વિતીયે યદિ વા તૃતીયે શુભેન યુક્તે હિબુકેઽથવા સ્યાત્ ।
સૌમ્યૈઃ સુહૃત્સપ્તદશસ્થિતૈર્વા નિઃસંશયં ચોરિતવસ્તુલાભઃ ॥ ૧૨ ॥

લગ્ને સમ્પૂર્ણતનુર્જીવેન સિતેન વીક્ષિતશ્ચન્દ્રઃ ।
કેન્દ્રોપચયસ્થૈર્વા યદિ સૌમ્યૈઃ સ્વોપચયગૈરાપ્તિઃ ॥ ૧૩ ॥

લગ્ને પૂર્ણશ્ચન્દ્રો જીવઃ શુક્રો બુધોઽપિ વા ભવતિ ।
લભતેઽપહૃતં દ્રવ્યં શુભયુક્તે સપ્તમે યદિ વા ॥ ૧૪ ॥

લગ્નાત્પાતાલાદ્વા દ્વિતીયસ્થોઽથવા તૃતીયસ્થઃ ।
ભવતિ શુભગ્રહશ્ચેન્નૂનં પ્રશ્ને નષ્ટં ધનં લભતે ॥ ૧૫ ॥

પાપવિલગ્નં પાપે પશ્યતિ નષ્ટં વિનષ્ટમેવ સ્યાત્ ।
શુભખગલગ્ને તુ શુભૈર્દૃષ્ટે નષ્ટાપ્તિરેષ્ટવ્યા ॥ ૧૬ ॥

સિંહાલિકુમ્ભા યદિ પાપવીક્ષિતા યુતાઃ સ્મરસ્થાઃ સ્વનવાંશગામિનઃ ।
તદા વિનષ્ટં ત્વથવા બલાન્વિતે કુજેઽષ્ટમસ્થે યદિ તન્નવાંશે ॥ ૧૭ ॥

॥ ૧૦ મનોમુષ્ટિચિન્તાધ્યાયઃ ॥

લગ્નસ્થઃ શશિબુધવીક્ષિતઃ સુધાંશુશ્ચાન્દ્રિર્વા કથયતિ ચિન્તિતાં કુમારીમ્ ।
વૃદ્ધાં સ્ત્રીં શનિરિનિગીષ્પતી પ્રસૂતાં શુક્રારાવથ તરુણીં નરેઽપિ ચૈવમ્ ॥ ૧ ॥

અસ્તે સિતાર્કરવિજૈઃ પરકીયજાયા સ્વીયા ગુરૌ શશિનિ તત્તનયે ચ વેશ્યા ।
વાચ્યા વયશ્ચ શશિવત્પરિચિન્તનીયં સૌરેઽન્ત્યજાતિરિતરૈરપિ ચિન્તિતા સ્યાત્ ॥ ૨ ॥

લગ્ને ગ્રહૈરાત્મસમો બલસ્થૈર્ભ્રાતા તૃતીયૈસ્તનયઃ સુતસ્થૈઃ ।
માતા ચતુર્થૈરથવા સ્વસા સ્યાચ્છત્રુસ્થિતૈઃ શત્રુગતૈવ ચિન્તા ॥ ૩ ॥

ભાર્યા ભવેત્સપ્તમગૈરમીભિર્ધર્માશ્રિતો ધર્મસમાશ્રિતૈશ્ચ ।

ખસ્થૈર્ગુરુઃ સ્વાંશપમિત્રશત્રુસ્થાનેષુ તદ્વદ્ધલવત્સુ વાચ્યમ્ ॥ ૪ ॥

ભાગે ચરે ચરવિલગ્નગતે ચ મધ્યાદ્ ભ્રષ્ટપ્રવાસવિષયા ભવતીહ ચિન્તા ।
ભ્રષ્ટઃ સ ચેદ્ભવતિ સપ્તમતસ્તદા તુ વ્યાવર્તતે યદિ ન વક્રગતો ગ્રહૌઽસૌ ॥ ૫ ॥

દીર્ઘાસ્તુલાલિમૃગનાયકકન્યકાઃ સ્યુર્મધ્યા ધનુર્મકરકર્કટયુગ્મસંજ્ઞાઃ ।
હ્રસ્વાશ્ચ મેષવૃષમીનઘટાઃ પ્રદિષ્ટા વસ્તુપ્રમાણમપિ રાશિસમાનમેવ ॥ ૬ ॥

રક્તૌ સૂર્યમહીસુતૌ શશિસિતૌ શ્વેતૌ સુધાદીધિતેઃ
સૂનુઃ સ્યાદ્ધરિતાકૃતિઃ સુરગુરુઃ પીતઃ શનિઃ શ્યામલઃ ।
સૂર્યઃ સ્યાચ્ચતુરસ્રકઃ ક્ષિતિસુતો વૃત્તસ્તથા રંધ્રવાન્
સૌમ્યો દીર્ઘતનુસ્તથા શશધરો દીર્ઘાકૃતિઃ સુંદરઃ ॥ ૭ ॥

જીવો વૃત્તવપુઃ સિતસ્ત્વતિકૃશઃ સૌરિશ્ચ દીર્ઘાકૃતિ-
-ર્મધ્યે રંધ્રસમન્વિતશ્ચ કથિતં રૂપં ગ્રહાણામિદમ્ ।
ઇત્યેવં કૃતચિન્તિતાદિવિષયપ્રશ્નેષુ વર્ણાકૃતી
દ્રવ્યસ્યાપિ બલાન્વિતગ્રહવશાન્નિઃસંશયં નિર્દિશેત્ ॥ ૮ ॥

લગ્ને વાભ્યુદિતં ત્રિકોણભવને સ્વાંશં નિજાંશસ્થિતો
યઃ કશ્ચિદ્ગ્રહ ઈક્ષતે તદિહ વા સ્યાદ્ધાતુચિન્તા ધ્રુવમ્ ।
અન્યાંશે સમવસ્થિતઃ પુનરસૌ જીવસ્ય ચિન્તાકરૌ મૂલસ્યાપિ
પરાંશકે પરિગતઃ પશ્યન્ પરાંશં ગ્રહઃ ॥ ૯ ॥

વિદ્યાદ્ગ્રહે તુ વિષમે કિલ ધાતુમૂલ જીવાન્ સમે તુ વિપરીતમિદં વિચિન્ત્યમ્ ।
લગ્નાંશકક્રમવશાદ્ગણનીયમેવં સંક્ષેપ એષ વિવૃતિસ્ત્વતિચિન્તનેન ॥ ૧૦ ॥

બલિનૌ ભાસ્કરભૌમૌ ધાતુકરૌ સંસ્થિતૌ પ્રશ્ને ।
મૂલકરૌ શનિસૌમ્યૌ શશિગુરુભૃગુજાસ્તથા જીવાઃ ॥ ૧૧ ॥

મેષે સિંહે વૃશ્ચિકે વા વિલગ્ને ભૌમાર્કાભ્યામન્વિતે વીક્ષિતે વા ।
ધાતોશ્ચિન્તાં સૌરિચન્દ્રાત્મજાભ્યાં મૂલં યુગ્મે કુમ્ભકન્યામૃગેષુ ॥ ૧૨ ॥

મીનકર્કવૃષચાપતૌલિભિશ્ચન્દ્રશુક્રગુરુભિર્યુતેક્ષિતૈઃ ।
જીવમાહુરિતિ મિશ્રિતં ધનં મિશ્રિતગ્રહયુતેક્ષણાત્તથા ॥ ૧૩ ॥

---

॥ ૧૧ વૃષ્ટિનિર્ણયાધ્યાયઃ ॥

ચન્દ્રાર્કયોઃ શનિસિતૌ યદિ સપ્તમસ્થૌ તુર્યેઽષ્ટમે ચ ભવતો યદિ વા વિલગ્નાત્ ।

સ્યાતાં ધને ચ સહજે યદિ તૌ વિલગ્નાદ્વર્ષાસુ વર્ષણમચિરેણ તદા વિધત્તઃ ॥ ૧॥

પક્ષે સિતે સલિલરાશિગતાઃ શુભાશ્ચેત્ કેન્દ્રદ્વિતીયસહજાલયગાશ્ચ સમ્યક્ ।
ચન્દ્રોઽથવા સલિલરાશિવિલગ્નગશ્ચેત્ વૃષ્ટિં વદેન્નિયતમેવ તદા ધરિત્ર્યામ્ ॥ ૨॥

કર્કટમૃગમીનાનામુદયે ચન્દ્રં સિતોઽપિ વૃષ્ટિકરઃ ।
તદ્વત્કેન્દ્રોપગતૌ સિતચન્દ્રૌ વા શુભૈર્દૃષ્ટૌ ॥ ૩॥

શીતદ્યુતિઃ સલિલરાશિ વિલગ્નગામી વીર્યાન્વિતેન ભૃગુજેન નિરીક્ષ્યમાણઃ ।
વૃષ્ટિં કરોતિ મહતીં ભૃગુજોઽપિતદ્વચ્છીતાંશુના બલયુતેન વિલોકિતશ્ચેત્ ॥ ૪॥

## ॥ ૧૨ વિવાહવિચારાધ્યાયઃ ॥

લગ્નાચ્છશી ત્રિમદનાયસુતારિસંસ્થઃ સૂર્યામરેજ્યશશિજૈરવલોક્યમાનઃ ।
પ્રષ્ટુર્ભવેન્નિયતમેવ વિવાહદાતા કેન્દ્રત્રિકોણભવનેશ્ચથવા શુભાશ્ચ ॥ ૧॥

અત્રૈવ યદિ યોગે સ્યાચ્છુભઃ સપ્તમવેશ્મનિ ।
તદા લભેત્ સજ્જાયાં પાપશ્ચેદ્રૂપવર્જિતામ્ ॥ ૨॥

સમસ્થિતે સૂર્યસુતે વરસ્ય લભ્યા ભવેન્નિશ્ચિતમેવ કન્યા ।
અતોઽન્યથાત્વં વિષમસ્થિતેઽસ્મિન્નિઃસંશયં પ્રષ્ટુરુદાહરન્તિ ॥ ૩॥

સપ્તમવિત્તોપચયસ્થાનસ્થો ગુરુનિરીક્ષિતશ્ચન્દ્રઃ ।
વિદધાતિ યુવતિલાભં તન્નાશં પાપયુતદૃષ્ટઃ ॥ ૪॥

યસ્ય પ્રશ્નવિલગ્નાત્ ષષ્ઠાષ્ટમરાશિગો ભવેચ્ચન્દ્રઃ ।
વ્યૂઢવ્ય તસ્ય નૂનં મૃત્યુઃ સ્યાદષ્ટમે વર્ષે ॥ ૫॥

યદિ લગ્નગતઃ ક્રૂરઃ પાપસ્તસ્માચ્ચસપ્તમે ભવતિ ।
સપ્તભિરેવ તદાઽબ્દૈઃ પુંસો નિધનં વિનિર્દેશ્યમ્ ॥ ૬॥

એવં લગ્નોપગતે ચન્દ્રે તસ્માચ્ચ સપ્તમે ભૌમે ।
પરતો વિવાહકાલાજ્જીવેન્માસાષ્ટકં સ પુમાન્ ॥ ૭॥

ઉદયાષ્ટમરાશિસંસ્થિતે ભૃગુપુત્રેઽપ્યથવેન્દુનંદને ।
વિધવા ક્ષિતિજે તુ સપ્તમે મ્રિયતે નિશ્ચિતમેવ કન્યકા ॥ ૮॥

દિવામણિઃ સપ્તમગો લગ્નાત્કન્યાં મૃતપ્રજાં કુરુતે ।
કુલટામુદયોપગતઃ કુરુતે નૈવાત્ર સંદેહઃ ॥ ૯॥

સક્રૂરૌ કુરુતોઽમૃતાંશુશશિજૌ ષષ્ઠે સ્ત્રિયં દુર્ભગાં
કુર્વાતે શશિભાર્ગવૌ ચ કુલટામાયે ચ જાયાસ્થિતૌ ।
અત્રૈવેન્દુજભાર્ગવૌ જનયતો વૈધવ્યમાવશ્યકં
પ્રત્યેકં ચ સપાપકૈર્યદિ તતોઽવશ્યં તુ વેશ્યા ભવેત્ ॥ ૧૦ ॥

લગ્નાત્સ્મરેશત્રિસુતારિગશ્ચેદ્ ગુર્વર્કસૌમ્યૈઃ શશભૃન્ન ચાન્યૈઃ ।
દૃષ્ટો દિશેદાશુ તદા વિવાહં ચિરાત્સ વિઘ્નં ત્વશુભેક્ષિતશ્ચેત્ ॥ ૧૧ ॥

લગ્નગં શશિસુતં શશિનં વા વીક્ષતે બલયુતો યદિ શુક્રઃ ।
યોષિદાપ્તિરચિરેણ તદા સ્યાત્પાપદૃષ્ટિસહિતં તુ ન હીતિ ॥ ૧૨ ॥

ચરાલયસ્થૌ યદિ લગ્નચન્દ્રૌ વિલોક્યમાનૌ ભૃગુનન્દનેન ।
પાપગ્રહાઃ કણ્ટકસંગતાશ્ચેત્પ્રભૂતકાન્તાં લભતે તદાનીમ્ ॥ ૧૩ ॥

॥ ૧૩ સ્ત્રીપુંજન્માધ્યાયઃ ॥

સ્થિરે વિલગ્ને સ્થિરલગ્નગામિભિર્ગ્રહૈઃ શુભૈશ્ચાપિ વિલોકિતે ચ ।
ભૃતં યુવત્યા ધ્રુવમેવ ગર્ભં બ્રૂયાદિતિ શ્રીયવનાધિનાથઃ ॥ ૧ ॥

લગ્નતો વિષમરાશિગઃ શનિઃ પુત્રજન્મનિ ભવેત્સકારણમ્ ।
સ્ત્રીજનિશ્ચ સમગે શનૈશ્ચરે પ્રાહ દિવ્યગણકો બૃહસ્પતિઃ ॥ ૨ ॥

પુરુષવર્ગગતે ચ તથોદયે નરનભોગતિનાઽભિનિરીક્ષિતે ।
બલિનિ નિશ્ચિતમેવ સુતોદ્ભવો વરમપીહ શુભં લભતેઽઙ્ગના ॥ ૩ ॥

ઉદયગતે સ્ત્રીરાશૌ સ્ત્રીનવભાગેઽપિ પુંગ્રહાઽદૃષ્ટે ।
સ્ત્રીજન્મ ભવતિ તદ્વત્સ્ત્રીદ્રેષ્કાણોદયે યવનઃ ॥ ૪ ॥

ઓજર્ક્ષે પુરુષાંશકેષુ બલિભિર્લગ્નાર્કગુર્વિન્દુભિઃ
પુંજન્મ પ્રવદેત્સમાંશકગતૈર્યુગ્મેષુ તૈર્યોષિતઃ ।
ગુર્વર્કૌ વિષમે નરં શશિસિતૌ વક્રશ્ચ યુગ્મે સ્ત્રિયં
ધીલાભોપગતૈઃ શુભૈરુદયતઃ સ્ત્રી ગર્ભયુક્તા ધ્રુવમ્ ॥ ૫ ॥

ચન્દ્રલગ્નાન્તરગતૈર્ગ્રહૈઃ સ્યુરૂપસૂતિકાઃ ।
બહિરન્તશ્ચ ચક્રાર્ધે દૃશ્યાઽદૃશ્યાઽન્યથા પરે ॥ ૬ ॥

બલયુક્તૌ સ્વગૃહાંશેષ્વર્કસિતાવુપચયર્ક્ષગૌ પુંસામ્ ।
સ્ત્રીણાં વા કુજચન્દ્રૌ યદા તદા સમ્ભવતિ ગર્ભઃ ॥ ૭ ॥

સૌરાંશેઽબ્જાંશે વા ચન્દ્રઃ સૌરાન્વિતોઽથવા હિબુકે ।
શાન્તો દીપો જન્મન્યાધાને પ્રશ્નકાલે વા ॥ ૮ ॥

પાપદ્વયમધ્યસંસ્થિતૌ લગ્નેન્દૂઃ ન ચ સૌમ્યવીક્ષિતૌ ।
યુગપત્પૃથગેવ વા વદેન્નારી ગર્ભયુતા વિપદ્યતે ॥ ૯ ॥

ભૃગુસુતો વસુધાતનયો ગુરુર્દિનપતિઃ શશભૃદ્રવિનન્દનઃ ।
શશિસુતોઽપિ ચ લગ્નપતીરવિઃ શશધરોઽપિ ચ માસપતિઃ ક્રમાત્ ॥ ૧૦ ॥

એતે યદા શત્રુગૃહે વસન્તિ યુદ્ધે જિતાઃ શત્રુભિરસ્તગા વા ।
અન્યત્ર વા પીડિતદેહભાજો ગર્ભસ્થ પાતં જનયન્તિ ખેટાઃ ॥ ૧૧ ॥

રક્તસ્તીક્ષ્ણતનુર્દિનેશ ઉદિતઃ સૌન્દર્યવાન્ શીતગુઃ
ક્રૂરાક્ષોધરણીસુતોઽતિવિનયી સોમાત્મજોઽપિ સ્મૃતઃ ।
જીવઃ પણ્ડિતમણ્ડલીષુ સહિતઃ શુક્રશ્ચ કાણઃ શનિઃ
ખઞ્જો લગ્નસમન્વિતો નિજફલં દત્તે બલં ચિન્ત્યામ્ ॥ ૧૨ ॥

## ॥ ૧૪ પ્રકીર્ણાધ્યાયઃ ॥

ચ્યુતિર્લગ્નાજ્જ્ઞેયા હિબુકગૃહતો વૃદ્ધિરુદિતા
પ્રવાસઃ સ્યાન્મધ્યાદ્ભવતિ વિનિવૃત્તિઃ સ્મરગૃહાત્ ।
ગૃહૈરેતત્પ્રશ્નોદયસમયગૈર્વાચ્યમખિલં
પ્રવિષ્ટઃ સ્વં ગેહં હિબુકગૃહગે પ્રોષિતપુમાન્ ॥ ૧ ॥

લગ્નાદ્દ્વિતીયનિધનાસ્તમયેષુ સૌમ્યૈઃ પાપૈસ્ત્રિષષ્ઠભગતૈશ્ચ શુભં ફલં સ્યાત્ ।
વ્યત્વાસતઃ સપદિ સેવકસેવ્યયોશ્ચ નિત્યં પ્રવાસકલહૌ પ્રતિપાદનીયૌ ॥ ૨ ॥

સૌમ્યૈરષ્ટમસંસ્થૈર્દ્વિતીયસંસ્થૈસ્તથૈવ દીર્ઘાયુઃ ।
ભવતિ પ્રષ્ટુર્નિત્યં તદન્યથાત્વેઽન્યથાત્વં સ્યાત્ ॥ ૩ ॥

દશમચતુર્થૈરેભિઃ સુખસમ્પત્ ક્ષતિસ્તુ વિપરીતે ।
વિત્તૈકાદશસંસ્થૈર્વિત્તાપ્તિઃ પ્રષ્ટુરાદેશ્યા ॥ ૪ ॥

પાપૈર્વિલગ્ને પરિપૃચ્છતસ્તુ શરીરપીડા કલહશ્ચ વાચ્યઃ ।
સુખક્ષતિઃ સ્યાત્સુખગૈર્ગૃહસ્ય ભેદસ્તથા બાંધવવિગ્રહશ્ચ ॥ ૫ ॥

અસ્તસ્થિતૈઃ સ્યાદ્ગમનસ્ય બાધઃ કર્મસ્થિતૈઃ કર્મવિનાશમાહુઃ ।
સર્વત્ર ચામુત્ર શુભૈર્ન દૃષ્ટે કૃચ્છ્રેણ સંસિદ્ધિમુદાહરન્તિ ॥ ૬ ॥

શીતદ્યુતૌ પાપયુતેક્ષિતે વા નારીજનૈઃ સ્યાત્સહ વિગ્રહસ્તુ ।
સુખસ્થિતૈર્દ્યૂનગતૈશ્ચ યદ્વા તથૈવ પાપૈરવધારણીયઃ ॥ ૭ ॥

લગ્નાદષ્ટમગેઽર્કે શુભયુક્તે વા શુભએન સંદૃષ્ટે ।
તસ્માદ્દેશાદન્યં દેશં ગત ઇતિ પિતા તસ્ય ॥ ૮ ॥

સૂર્યઃ કટુઃ શશધરો લવણો મહીજસ્તિક્તો વિમિશ્રિતરસશ્ચ શશાંકસૂનુઃ ।
જીવો ભવેચ્ચ મધુરોઽમ્લકષાયકૌ ચ શુક્રાર્કજૌ ચ બલવાનિહ કેન્દ્રગામી ॥ ૯ ॥

યસ્તત્ર કાલે કિલ લગ્નદૃગ્ વા ગ્રહો રસસ્તસ્ય તુ યઃ પ્રદિષ્ટઃ ।
સ એવ તાવત્પ્રતિપાદનીયો બલક્રમેણ દ્વિતયે રસાશ્ચ ॥ ૧૦ ॥

સૌમ્યર્ક્ષસંસ્થસ્ય સ શોભનઃ સ્યાત્પાપર્ક્ષસંસ્થસ્ય તુ નીરસઃ સ્યાત્ ।
ગ્રહસ્ય વક્રસ્ય રસં ન ભોક્તા ભુઙ્ક્તે ચ પાત્રે ચ પુનઃ પ્રદત્તમ્ ॥ ૧૧ ॥

સ્થિરે વિલગ્ને ન ગમાગમૌ સ્તો ન રોગશાંતિર્ન ચ વિત્તનાશઃ ।
મૃતો ન નષ્ટો ન પરાભવોઽપિ ચરે વિલગ્ને વિપરીતમેતત્ ॥ ૧૨ ॥

વિમિશ્રિતં સ્યાદ્દ્વિતનૌ તદંશદ્વયે ચરસ્થાવરવદ્વદન્તિ ।
શુભેક્ષણાલ્લગ્નશશાંકયોર્વા ભવેચ્છુભં ચાશુભમન્યથા તુ ॥ ૧૩ ॥

કંદૃક્શ્રોત્રનસાકપોલહનવો વક્રં ચ હોરાદય-
-સ્તેકણ્ઠાસકબાહુપાર્શ્વહૃદયક્રોડાનિ નાભિસ્તતઃ ।
વસ્તિઃ શિશ્નગુદે તતશ્ચ વૃષણાવૂરુ તતો જાનુની
જંઘાંઘ્રીત્યુભયત્ર વા સમુદિતે દ્રેષ્કાણભાગૈસ્ત્રિધા ॥ ૧૪ ॥

તસ્મિન્પાપયુતે વ્રણઃ શુભયુતે દૃષ્ટે ચ લક્ષ્માદિશે-
-ત્સ્વર્ક્ષાંશસ્થિરસંયુતે ચ સહજઃ સ્યાદન્યથાઽઽગંતુકઃ ।
મન્દેઽશ્માનિલજોઽગ્નિશસ્ત્રવિષજો ભૌમે બુધે ભૂભવઃ
સૂર્યે કાષ્ઠચતુષ્પદેન હિમગૌ શૃઙ્ગાબ્જજોઽન્યૈઃ શુભઃ ॥ ૧૫ ॥

સમનુપતિતા યસ્મિન્ભાગે ત્રયઃ સબુધા ગ્રહા ભવતિ
નિયમાત્તસ્યાવાપ્તિઃ શુભેષ્વશુભેષુ વા ।
વ્રણકૃદશુભઃ ષષ્ઠો લગ્નાત્તનૌ ભસમાશ્રિતે
તિલકમસકૃદ્દૃષ્ટઃ સૌમ્યૈર્ભવેત્સ ચ લક્ષ્મવાન્ ॥ ૧૬ ॥

ક્રિયઃ શિરોવક્રગમી વૃષોઽન્યઃ પાદાંસકૌ પૃષ્ઠમુરોઽથપાર્શ્વે ।
કુક્ષિસ્ત્વપાનોંઽઘ્ર્યથ મેઢ્રમુષ્કૌ સ્ફિક્પુચ્છમિત્યાહ ચતુષ્પદાંગે ॥ ૧૭ ॥

શંકુચ્છાયાંગુલિતો જ્ઞાત્વા તત્કાલલગ્નલિપ્તાસ્તુ ।
છાયાંગુલૈર્વિગુણિતા અથ પૃથક્ સપ્તભિર્વિભજેત્ ॥ ૧૮ ॥

શેષગ્રહગુણકારોઽર્કેન્દુકુજજ્ઞેજ્યશુક્રસુરીણામ્ ।
પંચૈકવિંશ મનવો નવાષ્ટ વહ્નીશ સંજ્ઞાશ્ચ ॥ ૧૯ ॥

( ૫ ) ( ૨૧ ) ( ૧૪ ) ( ૯ ) ( ૮ ) ( ૩ ) ( ૧૧ ) હત્વા સ્મરાવશેષે સ્યાદુદયઃ શુભગ્રહસ્ય તદા ।
અભિમતસિદ્ધિઃ પ્રષ્ટુર્ન ક્રૂરસ્યોદયે કિંચિત્ ॥ ૨૦ ॥

ગુણકારૈક્યવિભક્તે તસ્મિન્ સૂર્યાદિગુણકપરિશુદ્ધે ।
યસ્ય ન શુદ્ધ્યતિ વર્ગો વિજ્ઞેયસ્તદ્વશાત્કાલઃ ॥ ૨૧ ॥

ભૌમદિવાકરશેષે દિવસાઃ શુક્રેન્દુશેષતઃ પક્ષાઃ ।
સુરગુરુશેષે માસાઃ સૌમ્યે ઋતવઃ શનાવબ્દાઃ ॥ ૨૨ ॥

આધાને તદનુ જયે પરાજયે વા શત્રૂણાં નિધનવિધૌ સમાગમે વા ।
અર્થાપ્તૌ શુભમશુભં ચ સર્વ કાલં પૃચ્છાયાં સમયમિમં વિચિન્ત્ય વાચ્યમ્ ॥ ૨૩ ॥

રવૌ વિલગ્ને જ્વલનઃ પ્રદીપો રક્તં ચ વસ્ત્રં નૃપ-દર્શનં ચ ।
શ્વેતં ચ વસ્ત્રં સિતપુષ્પગન્ધા નારી ચ પીયૂષમયૂખગર્ભે ॥ ૨૪ ॥

મહીસુતે વિદ્રુમહેમરક્તસ્રાવસ્તથૈવાર્દ્રમૃગાદિમાંસમ્ ।
શશાંકપુત્રે નભસિ પ્રયાણં જીવે સુરૈર્બન્ધુજનેન યોગઃ ॥ ૨૫ ॥

શુક્રે સલિલોત્તરણં તુંગાક્રમણં ખરાંશુપુત્રે ચ ।
લગ્નસ્થે વક્તવ્યં સ્વપ્નપ્રશ્ને વિમિશ્રિતં મિશ્રૈઃ ॥ ૨૬ ॥

શત્રુગ્રહનીચગૃહગૈર્દુઃસ્વપ્નો નિર્જિતૈર્ગ્રહૈર્વાચ્યઃ ।
રવિકિરણલુપ્તકાયૈઃ સ્વપ્ને પ્રષ્ટુર્ભવેદ્ભંગઃ ॥ ૨૭ ॥

લગ્નચન્દ્રાન્તરાલસંખ્યયા ફલપાકકાલો વાચ્યઃ ।
સ્વસ્વપ્નાન્તરે યં નિરૂપ્યં પૂર્વપૂર્વવદિત્યેવં પ્રાહ યવનેશ્વરઃ ॥ ૨૮ ॥

અકચટતપયશવર્ગા રવિકુજસિતસૌમ્યજીવસૌરીણામ્ ।
ચન્દ્રસ્ય ચ નિર્દિષ્ટા પ્રશ્ને પ્રથમોદ્ભવમ્ વર્ણમ્ ॥ ૨૯ ॥

જ્ઞાત્વા તસ્માલ્લગ્નં સંગૃહ્ય શુભાશુભં વદેત્પ્રષ્ટુઃ ।
વર્ગાદિમધ્યચરમૈર્વર્ણૈઃ પ્રશ્નોદ્ભવૈર્વિષમમ્ ॥ ૩૦ ॥

રાશિં લગ્નં પ્રવદેચ્છેષૈર્યુગ્મં સિતજ્ઞજીવાનામ્ ।
કુજરવિજયોશ્ચ નૈવં રવિશશિનોરેકરાશિત્વાત્ ॥ ૩૧ ॥

તસ્માત્પ્રાગ્વત્પ્રવદેત્પૃચ્છાસમયે શુભાશુભં સર્વમ્ ।
કાલસ્યાવિજ્ઞાનાદેતચ્ચિન્ત્યં સદા પ્રશ્ને ॥ ૩૨ ॥

॥ ૧૫ લગ્નચિન્તાધ્યાયઃ ॥

દેહઃ કોશો યોધો વાહ્યં મંત્રઃ શત્રુર્માર્ગોઽથાયુઃ ।
ચિત્તં કર્મ પ્રાપ્તિમન્ત્રી પ્રાગ્લગ્નાદ્યા ભાવાશ્ચિન્ત્યાઃ ॥ ૧ ॥

ત્રિલાભવર્જં રવિસૌરિભૌમા નિઘ્નન્તિ નો કર્મ ચ સૂર્યભૌમૌ ।
પુષ્ણન્તિ સૌમ્યા રિપુરાશિવર્જ્યં નાસ્તં ભૃગુર્મૃત્યુમિનર્ક્ષમિન્દુઃ ॥ ૨ ॥

લગ્નોપગતૈઃ સૌમ્યૈરારોગ્યં વિત્તસૌખ્યં ચ ।
અર્થસ્થૈરર્થચયો યોધવિવૃદ્ધિસ્તૃતીયસ્થૈઃ ॥ ૩ ॥

વાહનસુહૃદાં વૃદ્ધિશ્ચતુર્થગૈઃ પંચમૈસ્તુ મન્ત્રબલમ્ ।
રિપુનાશં ષષ્ઠસ્થા ભૃગુવર્જ્યં સપ્તમેઽધ્વહિતાઃ ॥ ૪ ॥

રક્ષત્યાયુર્નિધને શશિવર્જ્યં નવમભે યશઃ સમ્પત્ ।
કર્મણિ સિદ્ધિર્લાભો બલસંઘાતશ્ચ દશમાદ્યૈઃ ॥ ૫ ॥

ભૌમાર્કાર્કિશશાંકૈર્લગ્ને વધબન્ધમરણસંત્રાસાઃ ।
અર્થક્ષયો દ્વિતીયૈસ્તૃતીય સંસ્થૈર્યશો દ્યુતિમત્ ॥ ૬ ॥

વાહનમિત્રવિયોગો મન્ત્રસ્રાવો રિપુક્ષયશ્ચેતિ ।
હિબુકાદિષુ સપ્તમગૈઃ સ્વવિષયનાશો ભૃગુસુતે ચ ॥ ૭ ॥

મૃત્યુર્નિધનોપગતૈઃ સેનાવ્યસનં મહન્નવમસ્થૈઃ ।
દશમસ્થૌ કુજસૂર્યૌ જયદૌ ભઙ્ગપ્રદઃ સૌરિઃ ॥ ૮ ॥

જય એકાદશસંસ્થૈઃ ક્રૂરૈરન્ત્યોપગૈઃ સ્વબલભેદઃ ।
ઉપચયવર્જં સૌમ્યૈર્યત્તત્પાપૈર્વિપર્યસ્તમ્ ॥ ૯ ॥

ક્રૂરોઽપ્યનુકૂલસ્થઃ શસ્તો લગ્ને શુભોઽપિ નાનિષ્ટઃ ।
વક્રી ન શુભઃ કેન્દ્રે તદહસ્તદ્વર્ગલગ્નં ચ ॥ ૧૦ ॥

પ્રશ્નગતદ્રેષ્કાણે રાજા નેતા દ્વિતીયેઽસ્ય ।
પરતો ગણપુરોહિતભિષજાં પરતોઽસ્ય ભૃત્યાનામ્ ॥ ૧૧ ॥

સ્થાનપરાક્રમચિન્તા પરતો વ્યવહારનૃપસૈન્યે ।

અભ્યવહાર્યં શયનાસને ચ તત્પંચસુ ક્રમશઃ ॥ ૧૨ ॥

યાનાસનશય્યાવાહનાનિ દશમે પરતોઽન્નપાનાનિ ।
વાહનયોધાઃ પરતસ્ત્રયોદશેઽપિ યુવરાજઃ ॥ ૧૩ ॥

જ્ઞેયં બલં પ્રયાતુર્મન્ત્રસ્ય નિશ્ચયશ્ચ તત્પરતઃ ।
પરતઃ પંચદશાદ્યે દ્રેષ્કાણચતુષ્ટયે રિપવઃ ॥ ૧૪ ॥

એકોનવિંશતિતમે સૈનિકશયને ક્ષણાનિ પરતોઽર્થઃ ।
પરતોઽસ્ય દણ્ડનેતા સૈન્યસ્યોપદ્રવઃ પરતઃ ॥ ૧૫ ॥

સેનાછિદ્રં તસ્માત્સેનાનેતા ભવેચ્ચતુર્વિંશે ।
સેનારોગ્યં સૈન્યં ચતુઃપટંચ ક્રમાત્રિતયે ॥ ૧૬ ॥

કાર્યં કોશઃ ફલસિદ્ધયસ્ત્રયે ભૂભુજસ્ત્રયે પરતઃ ।
ધર્મક્રિયાર્થયોધાર્ચનં ચ યાત્રાસમાપ્તિશ્ચ ॥ ૧૭ ॥

ઇત્યુદયાદ્યા ભાવાદ્રેષ્કાણૈર્યે મયાઽઽદિષ્ટાઃ ।
સદસત્ફલમાદેશ્યં સદસદ્યુતવીક્ષણાત્તેષામ્ ॥ ૧૮ ॥

નવમાંશે તિગ્માંશોર્વાહનનાશો વિલગ્નસમ્પ્રાપ્તે ।
કૃચ્છ્રાત્ સ્વગૃહગમનં પ્રતાપમૃદુલા ચ ચન્દ્રાંશે ॥ ૧૯ ॥

કૌજેઽગ્નિભયં બૌધે મિત્ર પ્રાપ્તિર્ધનાગમો જૈવે ।
ભોગવિવૃદ્ધિ શૌક્રે ભૃત્યવિનાશો રવિસુતાંશે ચ ॥ ૨૦ ॥

યદુદયતિ ફલં પ્રદિષ્ટં જનયતિ તસ્ય નવાંશકો વિલગ્ને ।
શુભભવનનવાંશકે સહાયં રિપુબલભાગ ઉપૈતિ યાતુરર્થાત્ ॥ ૨૧ ॥

શુભર્ક્ષે તન્નવાંશે ચ યો યાતિ મનુજેશ્વરઃ ।
શત્રુબલાન્નેતા સાહાય્યમુપગચ્છતિ ॥ ૨૨ ॥

યત્પ્રોક્તં રાશ્યુદયે દ્વાદશભાગેઽપિ તત્ફલં વાચ્યમ્ ।
યચ્ચ નવાંશકવિહિતં ત્રિંશાંશસ્યોદયે તત્સ્યાત્ ॥ ૨૩ ॥

ઉદયમુદયપં વા જન્મપં જન્મભં વા તદુપચયગૃહં વા વીક્ષ્ય લગ્ને યિયાસોઃ ।
વિનિહતમરિપક્ષં વિદ્ધિ શત્રોરિદં વા યદિ હિબુકસમેતં પૃચ્છતોઽસ્તસ્થિતં વા ॥ ૨૪ ॥

શત્રોર્હોરા રાશિસ્તદધિપતિર્જન્મભં તદીશો વા ।
યદ્યસ્તે હિબુકે વા તથાપિ શત્રુર્હતો વાચ્યઃ ॥ ૨૫ ॥

ક્ષુત્તૃષ્ણાર્તિર્માર્ગનાશોઽક્ષિરોગઃ ક્લેશસ્યામિસ્તિગ્મગોઃ પ્રાગ્વિલગ્ને ।
શસ્તં ચાન્દ્રે દેવતાર્થં સ્વદેશે કૌજે પિત્તવ્યાલશસ્ત્રાગ્નિપીડાઃ ॥ ૨૬ ॥

બૌધે તુષ્ટિર્વાંછિતાપ્તિર્યશશ્ચ જૈવેઽર્થાપ્તિઃ સ્થાનલાભોઽરિનાશઃ ।
સ્ત્રીરત્નાપ્તિઃ કાર્યસિદ્ધિશ્ચ શૌક્રે માન્દે વાહ્નિવ્યાધિનીચાપમાના ॥ ૨૭ ॥

વૃષવૃશ્ચિકકર્કટૈર્નૃણામનુકૂલૈરપિ લગ્નમાશ્રિતૈઃ ।
ગમનં ચ વદન્ત્યશોભનં મુનયોઽન્ત્યર્ક્ષસમાશ્રિતૈરપિ ॥ ૨૮ ॥

મીને કુટિલો માર્ગો ભવતિ તદંશેઽન્યરાશિલગ્નેઽપિ ।
નો યાનમાપ્યલગ્ને કાર્યં તેષાં નવાંશેઽપિ ॥ ૨૯ ॥

સર્વં પ્રમાણં મુનિનોદિતત્વાત્કિં ત્વત્ર હોરાબલમેવ યોગ્યમ્ ।
યસ્મિન્સહસ્રાંશુરવસ્થિતોઽર્ધે તિર્યઙ્મુખી સા ગણયેત્તતોઽન્યાઃ ॥ ૩૦ ॥

ધત્તે વાંછિતકાર્યમૂર્ધ્વવદના ક્લેશાદ્વિના લગ્નગા
ક્લેશાયાસપરિક્ષયાંશ્ચકુરુતે તિર્યઙ્મુખી ગચ્છતઃ ।
સૈન્યભ્રંશમધોમુખી પ્રકુરુતે કૃચ્છ્રાદ્ગૃહે ચાગમં
સર્વાઃ પુષ્ટફલપ્રદાઃ સ્વપતિના દૃષ્ટા ન પાપગ્રહૈઃ ॥ ૩૧ ॥

આરુદ્રમીશા રવિભૌમજીવ વિદ્ભાર્ગવૈનીન્દવ ઇત્યતોઽગુઃ ।
યામાર્ધમિન્દ્રાનિલકાલશંભુતોયાગ્નિચન્દ્રાસુરમધ્યતોઽન્યત્ ॥ ૩૨ ॥

વાર પ્રવૃત્તેર્ઘટિકા દ્વિનિઘ્નાઃ કાલાખ્યહોરાપતયઃ શરામાઃ ।
દિનાધિપાદ્યા રવિશુક્રસૌમ્યશશાંક સૌરીજ્યકુજાઃ ક્રમેણ ॥ ૩૩ ॥

વ્યતિપાતવિષ્ટિવૈધૃતિપાપગ્રહલગ્નદિવસેષુ ।
ચૌર્યાવસ્કન્દાનૃતસંગ્રામાઃ સિદ્ધિમાયાન્તિ ॥ ૩૪ ॥

પ્રાચ્યાદિદિક્ષુ મેષાદ્યાઃ સ્વપંચનવમૈર્યુતાઃ ।
તત્રગે યામિનીનાથે તદાશાગચ્છતોઽગ્રતઃ ॥ ૩૫ ॥

ઓજદણ્ડે પુરશ્ચન્દ્રે પૃષ્ઠેરાહૌ રણેજયઃ ।
સિદ્ધિર્દક્ષિણગે ચન્દ્રે હાનિર્વામે પરે મૃતિઃ ॥ ૩૬ ॥

યાત્રાદિગીશાદ્યદિ પંચમેઽન્યો ગૃહે ગ્રહો વીર્યયુતોઽવતિષ્ઠેત્ ।
સમુદ્યતાશાકથિતાનિ ભઙ્ક્ત્વા ફલાનિ વીર્યાન્નયતિ સ્વકાષ્ઠામ્ ॥ ૩૭ ॥

એકોઽપિ જીવજ્ઞસિતાઽસિતાનાં કુજાત્રિકોણે રવિતોઽથવેન્દુઃ ।
યત્રોદ્યતસ્તત્ર ન યાતિ યાતા તયોર્બલીયાન્નયતિ સ્વકાષ્ઠામ્ ॥ ૩૮ ॥

પરસ્પરં સૌરિકુજૌ રવીન્દૂ ત્રિકોણગૌ ભાર્ગવલોહિતૌ ચ ।
ફલં યદુક્તં તદશેષમેવ વિનાશ્ય પશ્ચાત્સ્વદિશં નયેતામ્ ॥ ૩૯ ॥

તારાગ્રહશ્ચેત્ક્ષિતિજાત્ત્રિકોણે સૂર્યાદપિ સ્યાદ્યદિ વા શશાંકઃ ।
દિગીશ્વરાત્પંચમગો બલી વા ગ્રહઃ સ્વકાષ્ઠાં નયતિ પ્રસહ્ય ॥ ૪૦ ॥

દૃષ્ટાઽદૃષ્ટફલાપ્ત્યૈ શાસ્ત્રં હૃદયે નિધાય મિહિરસ્ય ।
દૈવજ્ઞવલ્લભાખ્યં દૃષ્ટ્વા પ્રશ્નં વદેત્તજ્જ્ઞઃ ॥ ૪૧ ॥

યદુપચિતમન્યજન્મનિ શુભાઽશુભં તસ્ય કર્મણઃ પંક્તિમ્ ।
વ્યઞ્જયતિ શાસ્ત્રમેતત્ તમસિ દ્રવ્યાણિ દીપ ઇવ ॥ ૪૨ ॥

આદિત્યદાસતનયસ્તદવાપ્તબોધઃ કાપિત્થલઃ સવિતૃલબ્ધવરપ્રસાદઃ ।
આવન્તિકો મુનિમતાન્યવલોક્ય યત્નાદેતાં વરાહમિહિરો રચયાંચકાર ॥ ૪૩ ॥

॥ શ્રીઁ॥

Summary and Transliteration by Manish Shrivastaw. shrimanishmaharaj at yahoo.co.in
For the joy and enlightenment of lovers of Sanskrit and Astrology, only for personal reading and use, should not be exploited commercially by any means conceivable.

ગ્રંથ જ્ઞાતવ્ય Index

| અધ્યાય | નામ | શ્લોક સંખ્યા |
|---|---|---|
| ૧ | પ્રશ્નાવતાર | ૧૩ |
| ૨ | શુભાઽશુભ | ૨૬ |
| ૩ | લાભાઽલાભ | ૫ |
| ૪ | સામાન્યગમાઽઽગમ | ૧૦ |
| ૫ | શત્રુગમાગમ | ૧૨ |
| ૬ | પ્રવાસચિન્તા | ૧૧ |
| ૭ | જયપરાજય | ૨૯ |
| ૮ | રોગશુભ | ૮ |
| ૯ | નષ્ટલાભાઽલાભ | ૧૭ |
| ૧૦ | મનોમુષ્ટિચિન્તા | ૧૩ |
| ૧૧ | વૃષ્ટિનિર્ણય | ૪ |
| ૧૨ | વિવાહવિચાર | ૧૩ |
| ૧૩ | સ્ત્રીપુંજન્મ | ૧૨ |
| ૧૪ | પ્રકીર્ણ | ૩૨ |

૧૫ લગ્નચિન્તા ૪૩

*daivaGYa vallabhA Astrologer's beloved by VarAhmihir*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*